[९१४] वालमूललघ्वसुरालमङ्गुलीनां वा रो लमापद्यत इति वक्तव्यम् । (म.भा. ३.३९८)

वालः, वारः । मूलम्, मूरम् । लघु, रघु । असुरः, असुलः । अलम्, अरम् । अङ्गुलिः, अङ्गुरिः ।

[९१५] [1]कपिलकादीनां सञ्ज्ञाछन्दसोर्वा रो लमापद्यत इति वक्तव्यम् । (म.भा. ३.३९८)

कपिरकः, कपिलकः । [2]तिल्पिलीकम्, तिर्पिरीकम् । लोमानि, रोमाणि । पांशुरम्, पांशुलम् । कर्म, कल्म । [3]शुक्रः, शुक्लः । रलयोरेकत्वस्मरणम् इति केचित् । किमिदमेकत्वस्मरणमिति ? समानविषयत्वमेव तयोः स्मर्यते इत्यर्थः ॥

## उपसर्गस्यायतौ । (१९/२३२८)

अयतौ परतः उपसर्गस्य यो रेफः तस्य लकारः आदेशो भवति । प्लायते । पलायते । अत्र [4]च योऽयमेकादेशः, तस्य स्थानिवद्भावाद् अयतेः उपसर्गस्य [5]च विभागे सति, यदि अयतिग्रहणं [6]रेफस्य विशेषणम्, तदा 'येन नाव्यवधानं तेन व्यवहितेऽपि वचनप्रामाण्यात्' (व्या. प. ४६ ) [7]इति एकेन वर्णेन व्यवधानेऽपि [8]लत्वं भवति । तथा च [9]पल्ययते इत्यत्रापि [10]भवति । उपसर्गविशेषणे तु अयतिग्रहणे सिद्धमेबैतत् सर्वम्, प्रतेरपि [11]तु व्यवहितेऽपि प्राप्नोति । तत्र केषांचिद् [12]दर्शनं भवितव्यमेव प्लत्ययते इति । प्रथमपक्षदर्शनाभिनिष्टास्तु प्रत्ययते इत्येव [13]भवति इति मन्यन्ते । अपरे [14]तु प्रतिशब्दोपसृष्टस्य अयतेः प्रयोगमेव नेच्छन्ति । निस् दुस् इत्येतयोस्तु रुत्वस्यासिद्धत्वाल् [15]लत्वेन नैव भवितव्यम् । [16]निरयणम् । दुरयणम् ॥

## ग्रो यङि । (२०/२६३०)

गॄ इत्येतस्य धातोः रेफस्य लकार आदेशो भवति यङि परतः । [17]निजेगिल्यते, निजेगिल्येते, [18]निजेगिल्यन्ते । भावगर्हायां [19]ग्रो यङ विहितः[20] । केचिद् ग्रः इति गिरतेः गृणातेश्च [21]सामान्येन ग्रहणम् इच्छन्ति । अपरे तु गिरतेरेव, [22]न गृणातेः । गृणातेर्हि यङेव नास्ति, अनभिधानाद् इति । यङि इति किम् ? निगीर्यते ॥

## अचि विभाषा । (२१/२८४१)

अजादौ प्रत्यये परतो ग्रो रेफस्य विभाषा [23]लकारादेशो भवति । निगिरति, निगिलति । [24]निगरणम्, निगलनम् । निगारकः, निगालकः । इयं तु व्यवस्थितविभाषा । तेन गलः इति प्राण्यङ्गे नित्यं लत्वं भवति,

---

1. कपिरकादीनाम् क. 2. तिल्पिलीकः, तिल्पिरीकः इ. 3. शुक्रः शुक्लः नास्ति क.इ. 4. च नास्ति क.इ.ब. 5. चाविभागे ब. 6. रेफविशेषणम् क. 7. इति नास्ति इ. 8. सति इत्यधिकम् क. 9. प्रत्ययते क. 10. प्रवर्तते क.इ, प्रवर्तयते ह. 11. तु नास्ति ब. 12. दर्शने क. 13. भवितव्यम् क.इ.ब.ह. 14. पुनः क. 15. लत्वं नैव भवति इति ह. 16. उदाहरणमिदं नास्ति क.ह. 17. निजेगल्यते इ. 18. नास्ति ह. 19. ग्रो नास्ति ह. 20. इत्वे कृत्वे रपरत्वे च दीर्घस्य असिद्धत्वात् नित्यत्वाच्च लत्वे कृते तन्निमित्तत्वाभावात् दीर्घत्वं न भवति इत्यधिकम् क. 21. सामान्येन नास्ति इ. 22. न गृणातेः नास्ति ब. 23. लकार आदेशः क. इ. 24. निगिरणं निगिलनम् ह.